National Journal of
Hindi & Sanskrit Research

**ISSN: 2454-9177**
**NJHSR 2025;** 1(59): 237-239
© 2025 NJHSR
www.sanskritarticle.com

**रश्मिता दलेइ**
साहित्य-विभागः,
राष्ट्रियसंस्कृतविश्वविद्यालयः,
तिरुपतिः

**Correspondence:**
**रश्मिता दलेइ**
साहित्य-विभागः,
राष्ट्रियसंस्कृतविश्वविद्यालयः,
तिरुपतिः

# सौभाग्यनूपुरं महाकाव्ये शिवस्तुतिः वर्णनम्।

**रश्मिता दलेइ**

आचार्यराधावल्लभत्रिपाठीमहोदयः संस्कृतसाहित्यं प्रति प्राच्य तथा पाश्चात्यपरम्परायाः सुविज्ञः मनीषीःआसीत्।तस्य जन्म १५ फरवरी १९४९ तमे वर्षे मध्यप्रदेशस्य राजगढ जिल्लायामभूत्। तस्य पितरौ प.गोकुलप्रसादत्रिपाठी गोकुलवाई श्च आस्ताम्। पिता प.गोकुलप्रसादत्रिपाठी संस्कृत तथा हिन्दी साहित्ययोः मर्मज्ञः विद्वान् कविः समीक्षकश्चासीत्।सः तु बहुनि काव्यानि रचितवन्तः।तेषु सौभाग्यनूपुरं महाकाव्यं अन्यतमः।

सृष्टेः पूर्वं न सत् (तर्कः) आसीत्। न असत् (कर्म) आसीत्। एकः एव निर्भयः शिवः आसीत्। अतः 'सृष्टेः पुरतः यत् वस्तु अस्ति।तत् जगतः कारणं सः ब्रह्म एव इति।तेन 'ब्रह्म' नाम 'शिव' इति सिद्धम्।अयम् शिवः शाश्वतः अजः च। तस्य आदिः अन्त्यः च नास्ति।सः नित्यः शाश्वतः च अस्ति। एतानि सर्वाणि शुद्धिकरणानि अपि तान् शुद्धयन्ति।एवं प्रकारे भगवान् शंकर परम सिद्धान्त अर्थात् यस्मात् परं अन्यत् किमपि नास्ति - 'यस्मात् परं नपरमस्ती किञ्चित्'।

## <u>शिवस्तुतिः</u>

शिवस्तोत्ररत्नाकर पुस्तके शिवस्तुतिः, शम्भुस्तुतिः, महादेवस्तुतिः, महाकालस्तुतिः, शिवताण्डवस्तुतिः, श्रीशिवस्तुतिः, गौरीश्वरस्तुतिः, शिवशिरोमालिकास्तुतिः इत्यादयः वर्णितमस्ति।

प्रथमतः श्रीस्कन्दमहापुराणे **कुमारिकाखण्डे शिवस्तुतिः** स्कन्दस्वामीनः उक्तवन्तः-

**नमः शिवायास्तु निरामयाय नमः शिवायास्तु मनोमयाय।**
**नमः शिवायास्तु सुरार्चिताय तुभ्यं सदा भक्तकृपापराय ।१॥**
**नमो भवायास्तु भवोद्भवाय नमोऽस्तु ते ध्वस्तमनोभवाय।**
**नमोऽस्तु ते गूढमहाव्रताय नमोऽस्तु मायागहनाश्रयाय॥ २॥**
**नमोऽस्तु शर्वाय नमः शिवाय नमोस्तु सिद्धाय पुरातनाय।**
**नमोऽस्तु कालाय नमः कालाय नमोऽस्तु ते कालकलातिगाय। ३॥**[1]

इति श्रीस्कन्दमहापुराणे कुमारिकाखण्डे शिवस्तुतिः।

## <u>शम्भुस्तुतिः</u>

**नमामि शम्भुं पुरुषं पुराणं नमामि सर्वज्ञमपारभावम् ।**
**नमामि रुद्रं प्रभुमक्षयं तं नमामि शर्वं शिरसा नमामि ॥ १ ॥**
**नमामि देवं परमव्ययं तमुमापतिं लोकगुरुं नमामि।**
**नमामि दारिद्र्यविदारणं तं नमामि रोगापहरं नमामि ॥ २ ॥**
**नमामि कल्याणमचिन्त्यरूपं नमामि विश्वोद्भवबीजरूपम्।**
**नमामि विश्वस्थितिकारणं तं नमामि संहारकरं नमामि ॥ ३ ॥**
**नमामि गौरीप्रियमव्ययं तं नमामि नित्यं क्षरमक्षरं तम्।**
**नमामि चिद्रूपममेयभावं त्रिलोचनं तं शिरसा नमामि ॥ ४ ॥**[2]

इति श्रीरामस्य श्रीब्रह्मपुराणे शम्भुस्तुतिः ।।

**महाकालस्तुतिः**

**नमोऽस्त्वनन्तरूपाय नीलकण्ठ नमोऽस्तु ते।**
**अविज्ञातस्वरूपाय कैवल्यायामृताय च॥१॥**
**नान्तं देवा विजानन्ति यस्य तस्मै नमो नमः।**
**यं न वाचः प्रशंसन्ति नमस्तस्मै चिदात्मने ॥२॥**
**योगिनो यं हृदःकोशे प्रणिधानेन निश्चलाः।**
**ज्योतीरूपं प्रपश्यन्ति तस्मै श्रीब्रह्मणे नमः।३॥**
**कालात्पराय कालाय स्वेच्छया पुरुषाय च।**
**गुणत्रयस्वरूपाय नमः प्रकृतिरूपिणे। ४॥[3]**

इति श्रीस्कन्दमहापुराणे ब्रह्मखण्डे महाकालस्तुतिः।

**शिवताण्डवस्तुतिः**

**देवा दिक्पतयः प्रयात परतः खं मुञ्चताम्भोमुचः।**
**पातालं व्रज मेदिनी प्रविशत क्षोणीतलं भूधराः।**
**ब्रह्मन्नुन्नय दुरमात्मभुवनं नाथस्य नो नृत्यतः।**
**शाम्भोः संकटमेतदित्यवतु वः प्रत्सारणा नन्दिनः॥१॥[4]**

इति शिवताण्डवस्तुतिः।।

**श्री शिवस्तुतिः**

**नमस्तुङ्गशिरश्चम्बिचन्द्रचामरचारवे।**
**त्रैलोक्यनगरारम्भमूलस्तम्भाय शम्भवे॥१॥**
**चन्द्राननार्धदेहाय चन्द्रांशुसितमूर्तये।**
**चन्द्रर्कानलनेत्राय चन्द्रार्धशिरसे नमः॥२॥[5]**

इति श्री शिवस्तुति: सम्पूर्ण।

सौभाग्यनूपुरं महाकाव्ये शिवस्तुतिः-

**यमक्षरसमाम्नायमस्मभ्यं दत्तवानसि।**
**तेनैव क्रियाते देव त्वादीयेयं स्तुतिस्तस्था।।**
**त्वया प्रवर्तितं लास्यं नर्त्तनं चापि ताण्डवम्।**
**नर्तिताऽहं तथा कुर्वे शम्भो आराधनं तव।।[6]**

अहो देव! त्वया लास्य नृत्यं ताण्डवनृत्यं च प्रवर्तितम्।यत् प्रकारेण अहं त्वां तेषां माध्यमेन पूजयामि। तथैव त्वं अस्मान् वर्णमालां दत्तम्। एवं प्रकारेण तव स्तुतिः भवितुं अर्हति।

**यदीयभक्तिभावना समस्तभीतिभञ्जनी।**
**नितान्तशान्तिदायिनी प्रकामकामधायिनी।।[7]**

यस्य भक्तिः सर्व भीर्तिं भङ्गयति। अत्यन्तं शान्तं दायकं तथा सर्वकामपूरयतिश्च।

**सुखं सुतोषदायिने तथाशुतोषशंसिने।**
**नतेन मस्तकेन ते शिवाय मे नमो नमः।।**
**त्वमेव दर्पणो यतस्त्वमेव बिम्बतां गतः।**
**विधाय ते समर्पणं जनः पृथङ् न ते मतः।।[8]**

सुखेन सह तृप्तिप्रदम् आशुतोषं नाम तं शिवं प्रणमामि। त्वं दर्पणं त्वं च प्रतिबिम्बम्। भवतः कृते आत्मानं दत्तवान् ।सः त्वत् भिन्नः नास्ति।

**स्वकं विशीर्णतान्तवं प्रपन्नपापपंकिलम्।**
**चिदम्बराय ते मया समर्पितं चिदम्बरम्।।**
**अयं भवार्णवो भव त्वमेव चासि सन्ततः।**
**तरङ्ग एक एष चाहमस्मि तत्र चोत्थिथः।।[9]**

मम इदं चिदम्बरं अर्थात् चैतन्यवस्त्रं पापस्य रजसा चीर्णं चीर्णं च ते चिदम्बराय अर्थात् आकाशचैतन्यस्य उपरि समर्पितम्।हे भव नाम शिव त्वमिदं भवर्णवः। अहं तत्र उदयमानः तरङ्गः।

**व्रजामि तत्र वै लयं त्वदेकरूपतां गतः।**
**अहं तु बिन्दुरास्मि ते त्वमेष सागरायितः।।**
**स सागरात् प्रजायते क्षणे क्षणे च भंगुरः।**
**तरङ्गः एव सागरायते त्वसौ पुनः पुनः।।[10]**

त्वया सह एकत्वात् अहम् अस्मिन् भवर्णवे लीनः भवामि। अहं बिन्दुः, त्वं च समुद्रः असि। तरङ्गः समुद्रे एव जायते। प्रतिक्षणं प्रकीर्णं करोति। परन्तु स एव तरङ्गः समुद्रः भवति।

**मनस्तरङ्गनिर्मिता च वैखरी परात्मिका।**
**तव स्तुतिस्ववात्मिकाऽथ तुभ्यमेव सार्पिता।।**
**शिवस्तुतिं शिवस्य वल्लभेन केनचित कृताम्।**
**पठन्ति ये नरा इमां प्रयान्ति तेऽपि धन्यताम्।।[11]**

मनसि तरङ्गात् निर्मिता एषा वैखारी (वाक्) परात्मिका भवति। तथैव तव स्तुतिः तव रूपम्। भवद्भ्यः अपि समर्पितम् अस्ति।एकवल्लभविरचितं शिवस्तुतिं ये पठन्ति ते अपि धन्याः भवन्ति।

**स्थिरं विधाय सन्ततप्रधावितं मनोजवम्।**
**श्रुतिं नयन्ति ये त्विमां तरन्ति ते भवर्णवम् ।।[12]**

ये नित्यं धावन्तं मनसः वेगं निवारयित्वा एतत् श्रृण्वन्ति,ते एतत् भवार्णवम् अतिक्रमयन्ति।

**उपसंहारः-**

भगवान् शङ्करस्य चरित्रम् अतीव उदात्तं दयालुः च अस्ति। ज्ञानत्यागस्य साधुत्वस्य च एते परमार्थाः।तस्य चन्द्रसूर्यः चक्षुः, स्वर्गः शिरः, आकाशः नाभिः, दिशः कर्णः श्च।न तस्य सदृशः दाता न तपस्वी न विद्या न यजमानः न वक्ता न प्रवचनकर्ता न च तस्य सदृशः धनी। सः सर्वदा सर्वैः पूर्णः भवति।भगवतः शिवस्य नानानामानि सन्ति। तस्य अनेकरूपेषु उमामहेश्वरः, अर्धनारीश्वरः, हरिहरः, मृत्युञ्जयः, पञ्चवक्त्रः, एकवक्त्रः, पशुपतिः, कृत्तिवासः, दक्षिणमूर्तिः, योगीश्वरः, नटराज इत्यादयः अतीव प्रसिद्धाः सन्ति। भगवान् शिवस्य एकं विशेषं रूपं लिङ्गरूपम् अस्ति। तत्र ज्योतिर्लिंगं, स्वयंभूलिंगं, नर्मदेश्वरलिंगम् इत्यादयः रत्नादिः तथा च धात्वादी लिङ्गं पार्थिवलिंगं च अन्तर्भवति। एतानि सर्वाणि रूपाणि भक्ताः सुभक्त्या पूजयन्ति, कीर्तनं च कुर्वन्ति।

**<u>सन्दर्भः ग्रन्थसूची-</u>**

1.शिवस्तोत्ररत्नाकरः, गीताप्रेस, गोरखपुरः।

2.सौभाग्यनूपुरं महाकाव्यम्, राधावल्लभत्रिपाठी

न्यु भारतीय बुक कार्पोरेशन, दिल्ली।

**पाद टिप्पणी:**

[1]शिवस्तोत्ररत्नाकरः, पृ.96

[2]तत्रैव, पृ.99

[3]तत्रैव, पृ106

[4]तत्रैव, पृ109

[5]तत्रैव, पृ-210

[6]सौ.नू.पृ. 235

[7]तत्रैव श्लो.18

[8]तत्रैव.श्लो.19, 20

[9]तत्रैव.श्लो. 21, 22

[10]तत्रैव श्लो.23, 24

[11]तत्रैव, श्लो.25.26

[12]तत्रैव, श्लो.27